"ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते।
लोहसिंहानिका किट्टी सिंहाणञ्च निगद्यते॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम्॥"
इति भावप्रकाशः॥

(तथास्योद्धरणादिविधिः।
"शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्।
अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाद्यधिकारे॥
"कुरवं पथ्याचूर्णं द्विपलगन्धाश्मलोहकिट्टञ्च।
गुडरसस्यार्द्धपलं भृङ्गस्य रसं केशराजस्य॥"
इति वैद्यकचक्रपाणिसंग्रहे परिणामशूलाधिकारे॥)

लोहचूर्णं, क्ली, (लोहस्य चूर्णम्।) लोहकिट्टम्। इति राजनिर्घण्टः॥ (यथा, बृहत्संहितायाम्। ७६।३।
"माक्षीकधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि योऽद्यात्।
सैकानि विंशतिरहानि जरान्वितोऽपि
सोऽशीतिकोऽपि रमयत्यबलां युवेव॥")

लोहजं, क्ली, (लोहात् जायते इति। जन्+डः।) लोहकिट्टम्। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, "मण्डूरं लोहजं किट्टम्।" इति वैद्यकरत्नमालायाम्॥) कांस्यम्। इति हेमचन्द्रः॥

लोहद्रावी [न्] पुं, (लोहानि द्रावयतीति। द्रु+णिच्+णिनिः।) टङ्कणः। इति राजनिर्घण्टः॥ (टङ्कणशब्देऽस्य विषयो विज्ञेयः॥)

लोहनालः, पुं, (लोहस्य नालं दण्डो यत्र।) नाराचः। इति त्रिकाण्डशेषः॥

लोहपृष्ठः, पुं, (लोहस्येव कठिनं श्यामलं वा पृष्ठं यस्य।) कङ्कपक्षी। इत्यमरः॥ लौहमयपृष्ठयुक्ते, त्रि॥

लोहप्रतिमा, स्त्री, (लोहस्य प्रतिमा।) लौहमयी प्रतिमा। तत्पर्य्यायः। सूर्म्मी २ स्थूणा ३। इत्यमरः॥ शूर्म्मी ४ शूर्म्मिः ५ शूर्म्मः ६। इति भरतः॥ शूर्म्मिका ७। इति शब्दरत्नावली॥

लोहमयं, त्रि, लोहात्मकम्। लोहनिर्म्मितम्। लोहशब्दात् तद्रूपार्थे मयट्प्रत्ययेन निष्पन्नम्॥ (यथा, छान्दोग्योपनिषदि। ६।१।५।
"यथा सौम्यैकेन लोहमणिना सर्व्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम्॥")

लोहमारकः, पुं, (लोहं मारयति जारयतीति। मृ+णिच्+ण्वुल्।) शालिञ्चशाकः। इति त्रिकाण्डशेषराजनिर्घण्टौ॥

लोहलः, पुं, (लोहं लातीति। ला+कः।) शृङ्खलाचार्य्यः। इति मेदिनी। ले, १२६॥

लोहलः, त्रि, (लोहमिव लातीति। ला+कः।) अव्यक्तवाक्। इत्यमरः॥ लोहग्राहकश्च॥

लोहवरं, क्ली, (लोहेषु सर्व्वतैजसेषु वरम्।) स्वर्णम्। इति त्रिकाण्डशेषः॥

लोहश्लेषणः, पुं, (लोहानि सर्व्वतैजसानि श्लेषयति योजयतीति। श्लिष+ल्युः।) टङ्कणः। इति हेमचन्द्रः॥

लोहसङ्करं, क्ली, (लोहानां सङ्करो यत्र।) वर्त्तलोहम्। इति राजनिर्घण्टः॥ मिश्रिततैजसञ्च॥

लोहाख्यं, क्ली, (लोहमेव आख्या यस्य।) अगुरु। इति रत्नमाला॥

लोहाभिसारः, पुं, (लोहानां शस्त्रादीनां अभिसारो यत्र।) लोहाभिहारः। इत्यमरटीकायां भरतः॥

लोहाभिहारः, पुं, (लोहानामभिहारो यत्र।) शस्त्रभृतां राज्ञां नीराजनाविधिः। इत्यमरः॥ महानवमीदीप्तायां अश्वादीनां नीराजने सति पश्चात् शस्त्रधारिणां राज्ञां यः शस्त्रोक्तो निर्म्मञ्छनप्रधानो विधिः प्रस्थानात् प्राक् स लोहाभिहारः। लोहस्य शस्त्रस्य अभिहारः सर्व्वतो हरणमत्रेति बहुव्रीहिः। लोहाभिहार इत्युक्तो विधिर्नीराजनोत्तर इत्यमरमाला॥ लोहोऽस्त्री शस्त्रके लौहे इति मेदिनी॥ लोहाभिसार इति पठन्त्यन्ये तत्र लोहं शस्त्रं अभिसार्य्यते प्रस्थाप्यतेऽत्रेति घञ् वाहनायुधादेर्निःशेषेण राजनं यत्र सा नीराजना नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा। इति भरतः॥

लोहार्गलं, क्ली, (लोहस्य अर्गलमिव।) तीर्थविशेषः। यथा,—

वराह उवाच।
"शृणु देवि च तत्त्वेन यन्मां त्वं परिपृच्छसि।
गुह्यमन्यच्च वक्ष्यामि महतः कर्म्मणो गतिः॥
ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः।
म्लेच्छमध्ये वरारोहे हिमवन्तं समाश्रितम्॥
तत्र लोहार्गलं नाम निवासो मे विधीयते।
गुह्याः पञ्चदश यत्र समन्तात् पञ्चयोजनम्॥
सुलभं पुण्ययुक्तानां मम कर्म्मानुसारिणाम्।
तत्र तिष्ठाम्यहं भद्रे! उदीचीं दिशमास्थितः॥
तत्र ब्रह्मा च रुद्रश्च स्कन्देन्द्रश्च मरुद्गणाः।
आदित्या वसवो रुद्रा अश्विनौ च महौजसः॥
सोमो बृहस्पतिश्चैव ये चान्ये च दिवौकसः।
तेषाञ्चैवार्गलं दत्त्वा चक्रं गृह्य महौजसम्॥
ततो मे दानवाः सर्व्वे क्रमन्तो लोकमुत्तमम्।
मया चैवान्तरं कृत्वा कृत्वा मायाञ्च वैष्णवीम्॥
शतकोटिसहस्राणि शीघ्रमेव निपातितम्।
एवं लोहार्गलेत्यासीन्नाम मे तत्र कारितम्॥
एकधारा पतत्यत्र इन्द्रगोपकसन्निभा।
यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः॥
ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते।
अथात्र मुञ्चते प्राणानहङ्कारविवर्ज्जितः॥
ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते।
गुह्याख्याने महाभागे क्षेत्रे लोहार्गले मम॥
सिद्धिकामेन मर्त्त्येन गन्तव्यं नात्र संशयः॥
एतत्ते कथितं भद्रे लोहार्गलनिवासिनः।
माहात्म्यं पद्मपत्राक्षि गुह्यं पञ्चमहौजसम्।
मङ्गल्यञ्च पवित्रञ्च मम भक्तसुखावहम्॥"
इत्यादि वराहपुराणे लोहार्गलमाहात्म्यवर्णनं नामाध्यायः॥ * ॥ लौहकीलके क्ली स्त्री च॥

लोहि, क्ली, श्वेतटङ्कणम्। इति कश्चिद्राजनिर्घण्टः॥

लोहिका, स्त्री, (लोहमस्त्यत्रेति। लोह+ठन्।) लौहपात्रम्। तत्पर्य्यायः। खरकोन्दः २ खरपात्रम् ३। इति त्रिकाण्डशेषः॥

लोहितं, क्ली, (रुह्यते इति। रुह+"रुहे रश्च लो वा।" उणा० ३। ९४। इति इतन् रस्य लत्वञ्च।) रक्तगोशीर्षम्। कुङ्कुमम्। रक्तचन्दनम्। इति मेदिनी। ते, १४७॥ पत्तङ्गम्। हरिचन्दनम्। दृणकुङ्कुमम्। रुधिरम्। इति राजनिर्घण्टः॥ (यथा, मनुः। ४। ५६।
"नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत्।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा॥")
युद्धम्। इति हेमचन्द्रः॥ (सरोवरविशेषः। इति मात्स्ये। १२०। १२॥ माणिक्यम्। तत्पर्य्यायो यथा,—
"माणिक्यं पद्मरागः स्याच्छोणरत्नञ्च लोहितम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लोहितः, पुं, (रुह+इतन्। रस्य लः।) नदविशेषः। (सागरविशेषश्च। यथा, रामायणे। ४। ४०। ३९।
"ततो रक्तजलं भीमं लोहितं नाम सागरम्।
गत्वा प्रेक्षत ताञ्चैव बृहतीं कूटशाल्मलीम्॥")
भौमः। (यथा, बृहत्संहितायाम्। ६। ८।
"मध्येन यदि मघानां गतागतं लोहितः करोति ततः।
पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगाद्भयमवृष्टिः॥")
रक्तवर्णः। इति मेदिनी। ते, १४८॥ रोहितमत्स्यः। मृगविशेषः। इति शब्दरत्नावली॥ सर्पः। (यथा, महाभारते। २। ९। ८।
"वासुकिस्तक्षकश्चैव नागश्चैरावणस्तथा।
कृष्णश्च लोहितश्चैव पद्मश्चित्रश्च वीर्य्यवान्॥")
सुरान्तरः। इति धरणिः॥ मसूरः। इति शब्दचन्द्रिका॥ रक्तालुः। रक्तशालिः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४६।
"षष्टिका यवगोधूमा लोहिता ये च शालयः।
मुद्गाढकी मसूराश्च धान्येषु प्रवराः स्मृताः॥")
बलभेदः। इति हेमचन्द्रः॥ (पर्व्वतविशेषः। इति मात्स्ये। १२०। ११॥ कुशद्वीपस्थवर्षविशेषः। इति तत्रैव। १२२। ६५॥)

लोहितः, त्रि, रक्तवर्णयुक्तः। इत्यमरः॥ (यथा, मनुः। ५। ६।
"लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवांस्तथा।
शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत्॥")